LIBRARY

UNITED STATES BUREAU OF EDUCATION,

DEPARTMENT OF THE INTERIOR.

Entry Catalogue Number

68.758

Class

PRESENTED BY

THE LIBRARY OF CONGRESS

1800

Class PK3631

Book .A2 1887

॥ १०७ ॥ यः काममन्यु प्रजहाति राजा पात्रे प्रतिष्ठापयते धनञ्च। विशेषविच्छ्रुतवान् क्षिप्रकारी तं सर्वलोकः कुरुते प्रमाणम् ॥१०८॥ जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु दधाति दण्डम्। जानाति मात्राञ्च तथा क्षमाञ्च तं तादृशं श्रीर्जुषते समग्रा ॥ १०९ ॥ सुदुर्बलं नावजानाति कञ्चिद्युक्तो रिपुं सेवते बुद्धिपूर्वम्। न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः ॥ ११० ॥ प्राप्यापदं न व्यथेत कदाचिदुद्योगमन्विच्छति चाप्रमत्तः। दुःखञ्च काले सहते महात्मा धुरन्धरस्तस्य जिताः सपत्नाः ॥ १११ ॥ अनर्थकं विप्रवासं गृहेभ्यः पापैः सन्धिं परदाराभिमर्षम्। दम्भं स्तैन्यं पैशुनं मद्यपानं न सेवते यश्च सुखी सदैव ॥ ११२ ॥ न संरम्भेणारभते त्रिवर्गमाकारितः शंसति तत्त्वमेव। न मित्रार्थे रोचयते विवादं नापूजितः कुप्यति चाप्यमूढ़ ॥ ११३ ॥ योऽभ्यसूयत्यनुकम्पते च न दुर्बलः प्रतिभाव्यं करोति। नात्याह किञ्चित् क्षमते वै विवादं सर्वत्र तादृग्लभते प्रशंसाम् ॥ ११४ ॥ यो नोद्धतं कुरुते जातु वेशं न पौरुषेणापि विकथ्यतेऽन्यान्। न मूर्च्छितः कटुकान्याह किञ्चित् प्रियं सदा तं कुरुते जनो हि ॥ ११५ ॥ न वैरमुद्दीपयति प्रशान्तं न दर्पमारोहति नास्तमेति। न दुर्गतोऽस्मीति करोत्यकार्य्यं तमार्य्यशीलं परमाहुरार्य्याः ॥ ११६ ॥ न स्वे सुखे व कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः। दत्त्वा न पश्चात् कुरुतेऽनुतापं स कथ्यते सत्पुरुषार्य्यशीलः ॥ ११७ ॥ देशाचारान् समयान् जातिधर्मान् बुभूषते यः स परावरज्ञः। स यत्र तत्रापि गतः सदैव महाजनस्याभिपत्यं करोति ॥ ११८ ॥ दम्भं मोहं मत्सरं पापकृत्यं राजद्विष्टं पैशुन्यं पूगवैरम्। मत्तोन्मत्तैर्दुर्जनैश्चापि वादं यः प्रज्ञावान् वर्ज्जयेत्स प्रधानः ॥ ११९ ॥ दमं शौचं दैवतं मङ्गलानि प्रायश्चित्तान् विविधाल्लोकवादान्। एतानि यः कुरुते नैत्यिकानि तस्योत्थानं देवता धारयन्ति ॥ १२० ॥ समैर्विवाहं

